# Vatsagulmamahatmye Nrisimha Akhyanam

# વત્સગુલ્મમાહાત્મ્યે નૃસિંહ આખ્યાનમ્

## Document Information

Text title : Vatsagulmamahatmye Nrisimha Akhyanam

File name : vatsagulmamAhAtmyenRRisiMhaAkhyAnam.itx

Category : vishhnu, dashAvatAra, mAhAtmya, padmapurANa, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa. padmapurANe vatsagulmamAhAtmyAntargatam

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# વત્સગુલ્મમાહાત્મ્યે નૃસિંહ આખ્યાનમ્

રાજોવાચ-
ભગવઞ્શ્રોતુમિચ્છામિ તીર્થાનાં વિસ્તરં પુનઃ ।
આશ્રમાન્તર્ગતાનાં ચ બાહ્યાનાં ચ વિશેષતઃ ॥ ૧॥

વ્યાસ ઉવાચ-
શ્રુત્વા મુનિર્નૃપેણોક્તં વચઃ પરમશોભનમ્ ।
નૃસિંહતીર્થમાહાત્મ્યં વક્તું સમુપચક્રમે ॥ ૨॥

વસિષ્ઠ ઉવાચ-
રાજન્ વદામિ તે સર્વં તીર્થજાતકથાનકમ્ ।
શ્રુણુ ચૈકમનાસ્ત્વં હિ ગદતો વિસ્તરેણ મે ॥ ૩॥

મલ્લિકાર્જુનતઃ પૂર્વં તીર્થં પુણ્યતમં મહત્ ।
નારસિંહસ્ય દેવસ્ય મૂર્તિશ્ચાતિશોભના ॥ ૪॥

તસ્મિંસ્તીર્થે નરઃ સ્નાતિ નૃસિંહં યશ્ચ પશ્યતિ ।
તસ્ય નાસ્તિ ભયં ક્વાપિ દુઃખં દારિદ્ર્યમેવ ચ ॥ ૫॥

ભક્ત્યા જપતિ દેવેશં નૃસિંહં ભક્તકામદમ્ ।
સ યાતિ મનુજો ધીરસ્તદ્વિષ્ણોઃ પરમં પદમ્ ॥ ૬॥

અત્ર તે વર્ણયિષ્યામિ કથાં પાપપ્રણાશિનીમ્ ।
યાં શ્રુત્વા મુચ્યતે જન્તુર્જન્મમૃત્યુભયાન્નૃપ ॥ ૭॥

નિઃસપત્નાઃ પુરા હ્યાસન્નિર્ભયા દિવિ નિર્જરાઃ ।
વૈરભાવમજાનન્તઃ સતતં સુખવર્તિનઃ ॥ ૮॥

એતસ્મિન્નન્તરે બ્રહ્મા ચિન્તયામાસ ચેતસિ ।
નિરાન્તકાઃ સુરા નિત્યં નિશ્ચિતાઃ સર્વદા મુદા ॥ ૯॥

ક્રીડન્તિ વિવિધૈર્ભોગૈઃ કેવલં વિષયાકુલાઃ ।

ન જાનન્તિ પરં બ્રહ્મ યેન વિશ્વમિદં તતમ્ ॥ ૧૦॥

દુઃખલેશો ન ચૈવાસ્તિ હૃદિ યેષાં સદોત્સુકાઃ ।
ભયેન ભજતે લોકઃ સ્વધર્મં નાન્યથા સુખી ॥ ૧૧॥

દુર્મેધસો દુરાચારાઃ કામભોગપરાયણાઃ ।
ત્યજન્તિ નિતરાં ધર્મમધર્મનિરતાઃ પરમ્ ॥ ૧૨॥

વર્તતે ભુવનેષ્વેષામન્યેઽપિ દુરિતાનુગામ્ ।
વૃત્તિં ભજન્તિ પાપિષ્ઠાઃ સા સૃષ્ટેઃ ક્ષયકારિણિ ॥ ૧૩॥

તસ્માદેષુ ભયં કિઞ્ચિત્સૃજામિ પરિદુઃસહમ્ ।
તેન સેન્દ્રાઃ સુરા નિત્યમુદ્વિગ્નહૃદયાઃ કિલ ॥ ૧૪॥

સુખમુત્સૃજ્ય સદ્ભાવં ભજન્તિ દુરિતાપહમ્ ।
ઇતિ યાવદ્વિધિશ્ચિત્તે સઞ્ચિતયતિ કેવલમ્ ॥ ૧૫॥

તાવદ્દિતિઃ સમાયાતા કશ્યપસ્ય પ્રિયાં સતી ।
પ્રણમ્ય દણ્ડવદ્દેવં બ્રહ્માણં કમલાસનમ્ ॥ ૧૬॥

પૂજયામાસ વિધિવત્વંશુરં સ્વગુરોર્ગુરુમ્ ।
તસ્થૌ નમ્રતરા તત્ર મૌનમાશ્રિત્ય સુપ્રભા ॥ ૧૭॥

અથ દેવઃ પ્રજાનાથઃ ક્ષણાદૂર્ધ્વમવેક્ષ્ય ચ ।
દેવાદાત્મવધૂં પ્રાપ્તામશ્યત્ પુરતઃ સ્થિતામ્ ॥ ૧૮॥

પ્રહસ્ય ભગવાન્ સર્વં ચિન્તિતં હૃદિ યત્પુરા ।
મેને તત્ સફલં દૃષ્ટ્વા સ્નુષા દૈવપ્રચોદિતામ્ ॥ ૧૯॥

સાઽપિ તં સુપ્રસન્નસ્યમભિવીક્ષ્ય દયાનિધિમ્ ।
ઉવાચ વિધિમામન્ત્ર્ય પ્રજાકામા પતિવ્રતા ॥ ૨૦॥

દેવદેવ જગન્નાથ ભક્તકામપ્રપૂરક ।
મયિ કારુણ્યપૂર્ણાં ત્વં દૃષ્ટિ દેહિ જગદ્ગુરો ॥ ૨૧॥

અપ્રજાઽહં પ્રજાનાથ દૃષ્ટ્વા દેવાંસ્તથાવિધાન્ ।
દુનોમિ હૃદયે નિત્યં સપત્ન્યાઃ પરિતઃ સુતાન્ ॥ ૨૨॥

સ્ત્રીસ્વભાવાન્મહાભાગ મત્સરગ્રસ્તમાનસા ।
પ્રાર્થયે હિ વરં ત્વત્તઃ સુતો યેન ભવેન્મમ ॥ ૨૩॥

એકોઽપિ ગુણવાન્ પુત્રસ્ત્રૈલોક્યવિજયી મહાન્ ।
સૌખ્યં દદાતિ વૈ પિત્રોરૈહિકામુષ્મિકં પ્રભો ॥ ૨૪॥

તથા મે ભવિતા પુત્રઃ શૂરો બલસમુન્નતઃ ।
જિતારિઃ પ્રસભં દેવાન્વિજેતા રણમૂર્ધનિ ॥ ૨૫॥

ખ્યાતઃ સર્વેષુ લોકેષુ સમ્પાદય તથાવિધમ્ ।
ઇત્યાકર્ણ્ય વચસ્તસ્યા દિતેરૂર્જિતમાત્મભૂઃ ॥ ૨૬॥

સ્વાચિન્તિતં ચ સંસ્મૃત્ય તસ્મિન્ કાલે વધૂં પ્રતિ ।
ઉવાચ પ્રહસન્ દેવિ સિદ્ધસ્તેઽદ્ય મનોરથઃ ॥ ૨૭॥

ભવિતા તે સુતઃ સુભ્રુ લોકજિત્ ક્રોધવર્જિતઃ ।
દેવાન્ સર્વાનિમઞ્જેતા મહાબલપરાક્રમઃ ॥ ૨૮॥

ગચ્છ ત્વં કશ્યપં દેવિ કાલે સન્તુષ્ટમાનસા ।
ગુણૈઃ સન્તોષ્ય ભર્તારમિચ્છિતં પ્રાપ્સ્યસે ધ્રુવમ્ ॥ ૨૯॥

ઇત્યુક્ત્વા તાં તતોવેધા વિસસર્જ સ્નુષાન્તતઃ ।
સાઽપિ દેવી યથાકાલે કશ્યપં સમુપસ્થિતા ॥ ૩૦॥

પ્રેમ્ણા ચાટુવચોભિસ્તમાભિનન્દ્ય પતિં મુદા ।
કશ્યપોઽપિ તયા સાધ્વ્યા રેમે સુપ્રીતમાનસઃ ॥ ૩૧॥

જ્ઞાત્વા વિધિવિધાનં તત્રત્યાં ગર્ભમધાત્ પ્રભુઃ ।
દધાર ગર્ભં કિલ કશ્યપાત્ સા દિતિર્મહોગ્રં પરમં પ્રગલ્ભમ્ ॥ ૩૨॥

કાલેન વૃદ્ધિં સહસાઽપ તસ્ય દ્યુત્યા દિશો રેજુરધોર્ધ્વરૂપાઃ ।
અથ સા સુષુવે પુત્રં બાલાર્કસમતેજસમ્ ॥ ૩૩॥

સર્વસમ્પત્પ્રભું ચોગ્રં સુવર્ણવપુષં દૃઢમ્ ।
દૈત્યરાજમનાધૃષ્યં દેવદાનવમાનવૈઃ ॥ ૩૪॥

હિરણ્યકશિપુસ્તત્સ દદૌ નામ પિતામહઃ ।
ઉત્પન્નમાત્રઃ સહસા વવૃદ્ધે કિષ્કુપઞ્ચકમ્ ॥ ૩૫॥

ઉત્થાય સહસા માતુઃ સકાશાત્તપસે વનમ્ ।
યયાવતિબલોન્મત્તઃ ક્રોધી માની ચ નિર્ઘૃણઃ ॥ ૩૬॥

ગત્વા ગોકર્ણમાખ્યાતં ક્ષેત્રં સિદ્ધિકરં પરમ્ ।
તપસ્તત્ર ચચારોગ્રં દેવૈરપિ સુદુષ્કરમ્ ॥ ૩૭॥

દિવ્યવર્ષસહસ્રં ચ તપસ્તપ્ત્વા મહાસુરઃ ।
વ્યાકુલં તપસા તસ્ય સકલં ચાભવત્ જગત્ ॥ ૩૮॥

સભયં જગદાલોક્ય વિધાતા દૈત્યપુઙ્ગવમ્ ।
વરેણ શમયંસ્તત્ર પ્રયયૌ હંસયાનગઃ ॥ ૩૯॥

હિરણ્યકશિપું દૃષ્ટ્વા તપસા પરિવર્ધિતમ્ ।
ઉવાચ પ્રહસન્ વાચા મેઘગમ્ભીરનાદયા ॥ ૪૦॥

વત્સા તુષ્ટોઽસ્મિ તે બ્રૂહિ કિં કામં કરવાણ્યહમ્ ।
ઇત્યાકર્ણ્ય વિધેર્વાક્યમુત્થાય કરસમ્પુટઃ ॥ ૪૧॥

પ્રણિપત્ય જગદ્યોનિં વિનયાનતકન્ધરઃ ।
ઉવાચ પ્રસભં દૈત્યઃ સમ્બોધ્ય સ્વપિતામહમ્ ॥ ૪૨॥

પિતામહ મહાભાગ પ્રસન્નોઽસિ યદિ પ્રભો ।
તદા વરાન્ પ્રયચ્છ ત્વં મમેષ્ટાન્ વરદાયક ॥ ૪૩॥

તચ્છ્રુત્વા વચનં તસ્ય હિરણ્યકશિપોર્મહત્ ।
જગત્સ્રષ્ટા સ્વયમ્ભીતઃ કિં માં યાચિષ્યતે પરમ્ ॥ ૪૪॥

શનૈરુવાચ તં વેધાઃ પ્રાર્થયસ્વ હ્યાભિપ્સિતમ્ ।
અથાસૌ દિતિજઃ શ્રીમાન્ હિરણ્યકશિપુર્વરાન્ ॥ ૪૫॥

પ્રાર્થયામાસ તાનિષ્ટાન્ વરાન્નૃપતિસત્તમ ।
દેવદાનવદૈત્યેભ્યો મનુષ્યેભ્યસ્તથા વિભો ॥ ૪૬॥

તિર્યક્ કૃમિપતઙ્ગેભ્યો ન ભયં મમ જાયતામ્ ।
ન દિવા ન ચ મે રાત્રૌ નાકાશે ન ધરાતલે ॥ ૪૭॥

નાન્તરામરણં મે સ્યાન્ન શસ્ત્રાસ્ત્રજલાગ્નિભિઃ ।
ત્રૈલોક્યં વશગં મે સ્યાદમરત્વં પ્રયચ્છ મે ॥ ૪૮॥

શ્રુત્વા તત્પ્રાર્થિતં પ્રાહ તથેત્યમરતાં વિના ।
સુરશ્રેષ્ઠસ્તતઃ શીઘ્રં સ્વીયં ધામ યયૌ પુનઃ ॥ ૪૯॥

ચિરં ન સાધુના સ્થેયં ખલસ્યાગ્રે પાપદૃક્ ।
સાધું હિ વચસા ગૃહણાત્યતઃ સ્વલ્પચરો ભવેત્ ॥ ૫૦॥

દૈત્યોઽપિ ધાતરિ ગતે સ્વહિતં વિધાય

જ્ઞાત્વાऽऽત્મનાસ્ત્રિજગતોऽપ્યધિકત્વમુચ્ચૈઃ ।
સર્વં સમાપ્ય પરિહૃત્ય ચ તાપસાનાં
વેષં સ્વયં સકલદૈત્યપતિર્બભૂવ ॥ ૫૧॥

તતઃ સપાતાલતલં પ્રવિશ્ય જિત્વા સમસ્તાન્ સુતલાધિપાંશ્ચ ।
ભુવં ક્ષણાદેત્ય સભૂમિપાલાન્ સર્વાન્ વશીકૃત્ય દિનેસ્તનૂજઃ ॥ ૫૨॥

ઈયેષ જેતું સ ચ નાકપાલનિદ્રપ્રિયાં તાં નગરી બલોયઃ ।
અથદેવૈઃ શ્રુતો દૈત્યો બલવાન્ વરદર્પિતઃ ॥ ૫૩॥

સ્વસ્થાં જેતુમિયાસુશ્ચ ચિન્તામાપેદિરેऽમરાઃ ।
ભયભીતાઃ સુરાસ્તત્ર સર્વે સઙ્ગત્ય ચાબ્રુવન્ ॥ ૫૪॥

કિં વિધેયમિતો દૈત્યઃ સર્વાન્નો જેતુમિચ્છતિ ।
સત્વરં ભયનાશાર્થમુપાયાન્ કુરુતાચિરમ્ ॥ ૫૫॥

તતઃ પુરાણિ દુર્ગાણિ વિવિધાન્યાયુધાનિ ચ
બલાનિ શૂરયુક્તાનિ કચુકોષ્ણીષવન્ત્યલમ્ ॥ ૫૬॥

અગ્નિયન્ત્રાણિ ઘોરાણિ વપ્રપ્રાકારભિત્તિષુ ।
સુગુપ્તાસ્તે નિદધિરે સિદ્ધાન્યન્યાનિ ચાસકૃત્ ॥ ૫૭॥

એતસ્મિન્નન્તરે દૈત્યઃ સ્વપુરિં સહસાહ્યગાત્ ।
સત્વરં નન્દનોદ્યાનં વિધ્વસ્ય બલભિત્પુરીમ્ ॥ ૫૮॥

રુરોધ પરિતઃ સર્વે દૈત્યાસ્તસ્થુરુદાયુધાઃ ।
તતો યુદ્ધાય નિર્યાતાઃ સુરાઃ સજ્જાઃ સ્વલઙ્કૃતાઃ ।
મરુત્વાન્ મત્તમાતઙ્ગમારુહ્ય વરવર્મભૃત્ ॥ ૫૯॥

શ્વેતાતપત્રેણ વિરાજમાનઃ સમુન્નતઃ શ્રીપરિપૂરિતાઙ્ગઃ ।
વજં કરેણોજ્વલિતં દધાનો યયૌ રણં નાકપતિર્મહેન્દ્રઃ ॥ ૬૦॥

તથૈવમેષ હુતભુગ્ લુલાયં
પ્રેતાધિપશ્ચાધિરુરોહ શીઘ્રમ્ ।
અન્યેऽપિ યાનાનિ દિવૌકસૌ ભૃશં
સંસ્થાય સજ્જાઃ સમરાય નિર્યયુઃ ॥ ૬૧॥

ઉભે સૈન્યે સમાયાતે સમરાય સુદુર્જયે ।
તતઃ સમભવત્યુદ્ધં તુમુલં રોમહર્ષણમ્ ॥ ૬૨॥

શસ્ત્રાસ્ત્રપરમં ઘોરં ચણ્ડમુણ્ડાઙ્કિતં બહુ ।
યુદ્ધે વિનિર્જિતા દેવાઃ શસ્ત્રાસ્ત્રૈઃ શકલીકૃતાઃ ॥ ૬૩॥

પરાભૂતા સુરાસ્તેન દૈત્યરાજેન ચાખિલાઃ ।
પલાયિત્વા ગતાઃ સર્વે મત્વા તં વરદર્પિતમ્ ॥ ૬૪॥

વૈકુણ્ઠભુવનં રાજન્ બ્રહ્મેન્દ્રપ્રમુખાઃ સુરાઃ ।
હિરણ્યકશિપુઃ સર્વાનથ જિત્વા સુરાન્ સ્વયમ્ ॥ ૬૫॥

પુનર્ભવં સમાયાતઃ સૈન્યેન મહતા તતઃ ।
એકસ્મિન્ વસતિં ચક્રે પુરે હૈમવતે શુભે ॥ ૬૬॥

કદાચિચ્છુક્રમાનાય્ય તં પપ્રચ્છ દિતેઃ સુતઃ ।
સર્વ દૈત્યગુરો કાવ્ય સર્વે વિબુધસત્તમાઃ ॥ ૬૭॥

ક્વેદાનીં વસતિં ચક્રુર્ન તાન્જાનાતિ તત્વતઃ ।
કથં તે મત્કરે યાન્તિ વદોપાયં મહામતે ॥ ૬૮॥

નિશમ્ય દૈત્યવાક્યં સ શુક્રઃ પરમતત્વવિત્ ।
દૈત્યરાજાય દેવાનાં વૃત્તાન્તં સમભાષત ॥ ૬૯॥

શ્રૃણુ દૈત્યપતે પૂર્વં નારાયણમનામયમ્ ।
ધાતારં જગતશ્ચાપ્સુ શયાનો વિશ્વતોમુખમ્ ॥ ૭૦॥

સૃષ્ટિસ્થિતિવિનાશાનાં કારણં પરમાદ્ભુતમ્ ।
તમાદિકારણં ગત્વા દેવાઃ પ્રાઞ્જલયોઽબ્રુવન્ ॥ ૭૧॥

દેવદેવ જગન્નાથ જગત્ભયવિનાશન ।
શ્રૃણુ વિજ્ઞપ્તિમસ્માકં વયં ભયવિમોહિતાઃ ॥ ૭૨॥

તદ્ભયસ્ય ગતિં દેવ ચિન્ત્યતામાશુ માપતે ।
હરિરુવાચ-
કુતો વો ભયમુત્પન્નં યેન યૂયં વિમોહિતાઃ ॥ ૭૩॥

સમાચડ્ઢ્ં મહાભાગાસ્તદ્ધરામિ ન સંશયઃ ।
શુક્ર ઉવાચ-
તદ્ હરેર્ભાષિતં શ્રુત્વા લેખાસ્તં પુનરબ્રુવન્ ॥ ૭૪॥

દેવ જાનીહિ નઃ પ્રાપ્તં ભયં ભાવિ દિતેઃ સુતાત્ ।
કદાચિત્ સા દિતિઃ પ્રાપ્તા બ્રહ્મણઃ સદનં પ્રભો ॥ ૭૫॥

પૂજિતઃ પરયા ભક્ત્યા તયા સાધ્વ્યા પિતામહઃ ।
તત્પૂજયાઽતિસન્તુષ્ટસ્તમુવાચ સ્મિતાનનઃ ॥ ૭૬॥

અયિ વત્સે કિમર્થં ત્વમાગતાઽસિ ગૃહં મમ ।
યસ્તે કામોઽસ્તિ હૃદયે તં બ્રૂહિ કરવાણ્યહમ્ ॥ ૭૭॥

ઇત્થં સમાકર્ણ્ય વચઃ સમીરિતં સ્વયમ્ભૂ વા હૃષ્ટમુખી સતીદિત્તિઃ ।
નત્વા વિરિઞ્ચિ બહુકાલસમ્ભૃતં કામં સ્વકીયં સ્વયમબ્જજં જગૌ ॥ ૭૮॥

અહં વરિષ્ઠા કિલકશ્યપસ્ય પ્રિયાઽન્યપત્નીષુ મમાલ્પભાગ્યાત્ ।
ન સમ્ભૃતઃ કામ ઇહ પ્રજાયાઃ પ્રજાપતે તે ન દુનોમિ નિત્યમ્ ॥ ૭૯॥

તસ્માત્ પ્રભો ત્વામિતિ પ્રાર્થયેઽહં પ્રદેહિ પુત્રં સુખદં વરિષ્ઠમ્ ।
તતો વિધિસ્તન્મુખતોઽભિલાષં શ્રુત્વા દદૌ સા સ્વગૃહં જગામ ॥ ૮૦॥

વયં તતો ભીતતરા મુરારે ત્વામદ્ય સર્વે શરણં પ્રપન્નાઃ ।
તસ્માત્ભયાત્ પાહિ જગન્નિવાસ નોપેક્ષણીયાઃ સ્મ વયં ત્વદીયાઃ ॥ ૮૧॥

ઇતિ શ્રુતં તેન સુરેન્દ્રભાષિતં મુરારિણા શઙ્ખગદારિધારિણા ।
વિહસ્ય દેવાનવદન્મુહુર્વિભુર્ભયં યતો વસ્સમયે હિનસ્મિ તમ્ ॥ ૮૨॥

સુખેન વૈ ગચ્છત નિર્ગતજ્વરાઃ સુરાઃ સ્વધામાનિ મનોહરાણિ ।
યદા સ દૈત્યો ભવતામલીકં કર્તું સમીહેત તદા પુનર્મમ ॥ ૮૩॥

સ્થાનં સમાગચ્છત તસ્ય સર્વં વૃત્તાન્તમાખ્યાતુમમરં ચ મહ્યમ્ ।
ઇત્થં પુરા તેન સુરામુરારિણા સુસાત્વિતાઃ સ્વાનિ ગૃહાણિ તે યયુઃ ॥ ૮૪॥

અથ ત્વયા તે સમરે વિનિર્જિતા ગતાઃ પુનઃ શ્રીરમણસ્ય મન્દિરમ્ ।
ત્વયા જિતં સામરમુગ્રતેજસા જગત્પ્રભો તત્ કથિતં જગત્પ્રભુમ્ ॥ ૮૫॥

વૈકુણ્ઠ સાન્યધુના નિવિષ્ટાઃ સુખે સુરાસ્ત્યક્તભયાઃ સમસ્તાઃ ।
ત્વયા ન જેતું પરિશક્યતે વિભો સુરક્ષિતાસ્તેન જનાર્દનેન ॥ ૮૬॥

વસિષ્ઠ ઉવાચ-
હિરણ્યકશિપુસ્તસ્ય શુક્રસ્ય વચનં સ્ફુટમ્ ।
નિશમ્ય ક્રોધદીપ્તાસૌ હરૌ દ્વેષમકલ્પયત્ ॥ ૮૭॥

તદારભ્ય મહાદ્વેષ્ટો હૃદ્યવર્તત વિદ્વિષઃ ।
ન તસ્ય પૂજનં ચક્રે ન માનયતિ વૈષ્ણવાન્ ॥ ૮૮॥

પરાભૂતાઃ સમસ્તાસ્તે હરિભક્તાઃ સુરદ્વિષા ।

મૂર્તયોઽપિ હરેઃ સર્વા મજ્જિતાસ્તેન સાગરે ॥ ૮૯॥

પ્રાસાદા પતિતા સર્વે દેવતાનાં ભુવિ સ્થિતાઃ ।
ધર્ષણં કૃતવાન્ ઘોરમૃષયોઽપિ વિનાશિતાઃ ॥ ૯૦॥

અથ કાલેન મહતા હરિર્દૈત્ય વધાય ચ ।
અકરોન્મતિમાભાષ્ય વિબુધાન્નિકટસ્થિતાન્ ।
શ્રૃણુતામરમુખ્યા મે વાક્યં દૈત્યવધાશ્રિતમ્ ॥ ૯૧॥

જગત્રયં તેન દુરાત્મના ભૃશં પ્રતાપિતં ચોદ્ધતમાર્ગવર્તિના ।
અસહ્યમેતન્મમ તસ્ય જાતં નિહન્મિ તં શીઘ્રતરં દુરાસદમ્ ॥ ૯૨॥

ઇતઃ પરં નૈવ ચિરં હિ કુર્યાં વ્રજામિ તદ્ધામ નિયન્તુમુદ્ધતમ્ ।
ઇત્યુક્તવાન્ દેવપતિઃ સ્વયં હરિઃ સ્વાંશેન દૈત્યેન્દ્રગૃહે સુતોઽભૂત્ ॥ ૯૩॥

દેવદેવઃ સ્વયં વિષ્ણુર્વૈકુણ્ઠઃ કમલાપતિઃ ।
હિરણ્યકશિપોઃ પત્ન્યાં સ્વાંશેનાવિર્ભભૂવ હ ॥ ૯૪॥

હિરણ્યકશિપોઃ પત્ની પાતિવ્રત્યગુણૈર્યુતા ।
દધાર ગર્ભં પરમં દૈત્યવંશવિવર્ધનમ્ ॥ ૯૫॥

અથ સા સમયે દેવિ સુષુવે પુત્રમદ્ભુતમ્ ।
નામ્ના પ્રહ્લાદમિત્યેવં વિખ્યાતં ભુવનત્રયે ॥ ૯૬॥

હિરણ્યકશિપુઃ પુત્રં જાતં શ્રુત્વા મનોહરમ્ ।
સ્નાત્વા સચૈલમાનીય ગુરું કાવ્યમુવાચ હ ॥ ૯૭॥

કિં કાર્યમધુના વિપ્ર પુત્રે જાતે મયા વદ ।
શુક્રઃ પ્રાહ તદા દૈત્યં મઙ્ગલસ્નાનકારિણામ્ ॥ ૯૮॥

દૈત્યાધિપ મહારાજ જાતકર્મણિ સંસ્થિતે ।
વિધિવજ્જાતકર્માદ્ય કર્તવ્યં પુત્રજન્મનિ ॥ ૯૯॥

હિરણ્યં ધેનુ વાસાંસિ મુક્તારત્નાદિકં ચ યત્ ।
ધાન્યરાશિસ્તથા ચાન્યદશ્વકુઞ્જર વૈભવમ્ ॥ ૧૦૦॥

દેહિ દ્વિજેભ્યશ્ચાન્યેભ્યો દીનાનાથેભ્ય એવ ચ ।
અદ્ય ધન્યતરં દૈત્ય પુત્રજન્મદિનં શુભમ્ ॥ ૧૦૧॥

પુત્રલાભાત્ પરો લાભો નાસ્તિ ત્રિભુવને મહાન્ ।
તસ્માત્ સર્વપ્રયત્નેન દેયં સર્વં દ્વિજાતયે ॥ ૧૦૨॥

ઇતિ તસ્ય ગુરોર્વાક્યં ધર્મ્યં શ્રુત્વા સ દૈત્યરાટ્ ।
સ્વભૃત્યાનાહ સામાત્યાંસ્તથા કોશાધિકારિણઃ ॥ ૧૦૩॥

ધનમાનીયતાં ક્ષિપ્રં દાતુમિચ્છામિ ચામિતમ્ ।
તદાજ્ઞયાઽથ તદ્ભૃત્યા ધનં બહુલમાહરન્ ॥ ૧૦૪॥

સર્વં તદદ્વિજસાત્ કૃત્વા હસ્ત્યશ્વરથસંયુતમ્ ।
તથા દીનાન્ધકુબ્જેભ્યઃ શુક્રાય ચ દદૌ બહુ ॥ ૧૦૫॥

સ બાલો વવૃથે નિત્યં શુક્લપક્ષે યથા શશી ।
સ સાંવત્સરિકો બાલો હરિસ્મરણલાલસઃ ॥ ૧૦૬॥

બાલભાષણકૈર્નિત્યં વિષ્ણુનામાનિ ગાયતિ ।
તચ્છ્રુત્વા સપિતા તસ્ય પ્રહ્લાદસ્ય ચ દૈત્યરાટ્ ॥ ૧૦૭॥

ન જાનાતિ શિશોર્વાક્યમસ્પષ્ટં ગતવર્ણકમ્ ।
અક્ષરારમ્ભકાલે ચ તસ્યાદેશમથાકરોત્ ॥ ૧૦૮॥

સ બાલઃ સ્વગુરોર્ગેહં જગામાક્ષરલબ્ધયે ।
પિતુરાદેશસ્તત્ર લિલેખાદ્ભુતદર્શનઃ ॥ ૧૦૯॥

ગુરુણા પાઠિતાન્યેવ નાક્ષરાણિ પપાઠ સઃ ।
કકારાદિક્ષકારાન્તાન્યનવેક્ષ્ય હરિં પઠન્ ॥ ૧૧૦॥

ન શ્રૃણોતિ ગુરોર્વાક્યં ન બિભેતિ વ્યપેતભીઃ ।
નિર્ભયો નિતરાં દૈત્યતનયઃ સનયો મુદા ॥ ૧૧૧॥

સ્વમત્યા હરિનામાનિ પઠન્નાન્યમનાઃ શિશુઃ ।
ગુરુણા તાડિતો નૈવ સ્વમતં હિ જહાત્યસૌ ॥ ૧૧૨॥

તદા ગુરુરુવાચૈનમર્ભકં ભર્ત્સયન્ પરમ્ ।
રે વત્સ જનકસ્તેઽદ્ય શ્રૃણોતિ તવ દુર્મતિમ્ ॥ ૧૧૩॥

ત્વાં ચ માં ચ ક્રુધા દૈત્ય દૈત્યસ્તાડયિષ્યતિ મન્યુમાન્ ।
એવં હિ ગુરુણા બાલો ભાષિતોઽપિ વિચક્ષણઃ ।
જગાદ કિઞ્ચિદશુભં શુભં નો સ્તબ્ધલોચનઃ ॥ ૧૧૪॥

પુનસ્તથૈવ તામેવ હરિનામસ્રજં જગૌ ॥ ૧૧૫॥

સમન્યુસ્તદ્ગુરુસ્તસ્ય ગત્વા જનકમુદ્ધતમ્ ।

પ્રોવાચાયં તવ સુતઃ કથં દૈત્યપતે પ્રિયઃ ॥ ૧૧૬॥

ન ચ મદ્વચનં મૂઢો માનયત્યપિ કેવલમ્ ।
હરિનામસ્મૃતિં નિત્યં કરોત્યેવ ન ચાન્યથા ॥ ૧૧૭॥

પાઠિતોઽપિ મયા નૈવ પઠત્યનયપણ્ડિતઃ ।
કેનેદં શિક્ષિતં ચાસ્મૈ ન ચ તં વેદમ્યહં પરમ્ ॥ ૧૧૮॥

તાડનાર્હો હિ સોઽપ્યત્ર યોઽન્યથા શિક્ષયે શિશુમ્ ।
તચ્છ્રુત્વા પુત્રકાર્યં ચ ચુકોપ દિતિનન્દનઃ ॥ ૧૧૯॥

નિર્ભર્ત્સર્ય ગુરુમપ્યાશુ પુત્રમાહૂય મન્યુમાન્ ।
ઉવાચ ક્રોધતામ્રાક્ષઃ પ્રહ્લાદં જ્ઞાનિનાં વરમ્ ॥ ૧૨૦॥

અયિ વત્સ વદ ક્ષિપ્રં શિક્ષિતં ગુરુણા ચ તત્ ।
શ્રૃણોમિ પરમં પુત્ર તાપત્રયહરં મુદા ॥ ૧૨૧॥

યે પુત્રવન્તો મનુજાઃ સુતસ્યાનભાવદ્યાચ્ચ વિદ્યાં વિનયોપપન્નામ્ ।
શ્રૃણ્વન્તિ પશ્યન્તિ ચ તસ્ય ભાગ્યં તેષાન્ન દૂરેઽસ્તિ સુખં પરત્ર ॥ ૧૨૨॥

તાપત્રયં તે પરિહત્ય શીઘ્રં ભજન્તિ સૌખ્યં ભુવિ દુર્લભં નરાઃ ।
મૌર્ખ્યં ચ તસ્યૈવ વિલોક્ય દૂરાત્ ત્યજન્તિ સર્વં ન સુખં વ્રજેતિ ॥ ૧૨૩॥

ત્વમસિ પ્રેયસાં શ્રેષ્ઠ વદ શિક્ષાં ગુરોઃ કૃતામ્ ।
ઇતિ દૈત્યવચઃ શ્રુત્વા પ્રહ્લાદો વૈષ્ણવાગ્રણી ॥ ૧૨૪॥

નિર્ભયઃ પિતરં પ્રીત્યા પ્રોવાચ જનસંસદિ ।
હરિઃ શિક્ષાપ્રદો નાન્યઃ સર્વસાક્ષી યતો હિ સઃ ॥ ૧૨૫॥

તમનાદૃત્ય કિં ચાન્યદવાચ્યં વચ્મિ ભો પિતઃ ।
યસ્ય નામસ્મૃતિઃ સદ્યઃ પાતકક્ષયકારિણી ॥ ૧૨૬॥

વિહાય તાં કથં ચાન્યજ્જનઃ સ્મરતિ માદૃશઃ ।
વાસુદેવાત્ પરો દેવો નાન્યોઽસ્તિ ભુવનત્રયે ॥ ૧૨૭॥

તં વિહાય નાન્યં વૈ ભજામિ જનકપ્રિયમ્ ।
વિષ્ણુના વ્યાપ્તમખિલં જગત્ સ્થાવરજઙ્ગમમ્ ॥ ૧૨૮॥

મૂઢત્વાત્ તં ન જાનાતિ જનો હ્યજ્ઞાનમોહિતઃ ।
સંસારબન્ધવિચ્છિત્યૈ સેવનીયો જનાર્દનઃ ॥ ૧૨૯॥

તં દ્વિષન્તિ નરા મૂઢાસ્તે પતન્તિ ભવાર્ણવે ।
નાસ્તિ તેષાં કદાચિદ્વા દુઃખાબ્ધેસ્તરણં પુનઃ ॥ ૧૩૦॥

યે ભજન્તિ હરિં તાત તે તરન્તિ ભવં ક્ષણાત્ ।
વિમુખાસ્તં મહાભાગ તે હિ ગચ્છન્ત્યધોગતિમ્ ॥ ૧૩૧॥

તસ્માન્ મુકુન્દ મધુસૂદન ચક્રપાણે
લક્ષ્મીપતે યદુપતે નતપૂરિતાર્થ ।
વૈકુણ્ઠ માધવ જનાર્દન વાસુદેવ
સંસારતાપહરણાચ્યુત કેશવેતિ ॥ ૧૩૨॥

નિત્યં પઠેદિહ પુમાન્ હરિનામમાલાં
યઃ સંસ્મરેદનિશમૂર્જિતપાદયુગ્મમ્ ।
તસ્યાશુ નશ્યતિ ભયં ભજતઃ સમસ્તં
કસ્તં પ્રભુર્ભવતિ બાધયિતું સુરક્ષ્યમ્ ॥ ૧૩૩॥

ઇતિ પ્રહ્લાદવચનં સમાકર્ણ્ય દિતેઃ સુતઃ ।
તં ચુકોપાતિતામ્રાક્ષો ભર્ત્સયન્નિદમબ્રવીત્ ॥ ૧૩૪॥

રે રે મન્દ ત્યજાશુ ત્વં બાલ ચાપલમઞ્જસા ।
દૈત્યગોત્રે સમુત્પન્નઃ કથં શત્રું સ્મરસ્યલમ્ ॥ ૧૩૫॥

અસ્માકં શત્રવસ્તાત તવ તેઽપિ ન તે હિતાઃ ।
ત્વદીયં સકલં રાજ્યં દેશકોશબલાત્મકમ્ ॥ ૧૩૬॥

મદીયવાક્યકરણાત્ ભવિષ્યતિ ન ચાન્યથા ।
યદિ તદ્ભજને બુદ્ધિસ્તવ પુત્ર સમુત્થિતા ॥ ૧૩૭॥

તર્હિ દુઃખં મહત્તે સ્યાન્મરણાદધિકં તથા ।
માતાપિત્રોર્વચઃ પાલ્યં પુત્રેણ હિતમિચ્છતા ॥ ૧૩૮॥

તદન્યથા કૃતં ગર્વાદ્ધાનિસ્તસ્ય પદે પદે ।
ઇતઃપરં ન વક્તવ્યં દ્વિષન્નામ ત્વયાસુત ॥ ૧૩૯॥

તન્નામશ્રવણાત્ કોપો જાયતે હૃદિ મે મહાન્ ।
સામભાવેન તે પ્રોક્તં પુત્ર કારુણ્યતો મયા ॥ ૧૪૦॥

અતો દણ્ડાર્હતાં યાસિ યદિ ભૂયો વદિષ્યસિ ।
ઇત્યુક્ત્વોપરરામાથ હિરણ્યકશિપુઃ સુતમ્ ॥ ૧૪૧॥

સકોપસ્ય પિતુર્વાક્યં પ્રહ્લાદેન શ્રુતં મહત્ ।
વિહાય ભયમારાત્તમુવાચ પ્રીતિપૂર્વકમ્ ॥ ૧૪૨॥

ન ત્યજામિ પિતસ્તસ્ય વાસુદેવસ્ય સંસ્મૃતિમ્ ।
ન શત્રુર્હિ હરિર્મિત્રં સુહૃદ્ગોત્રં પિતા પ્રસૂઃ ॥ ૧૪૩॥

જગતસ્તં વિહાયાન્યં ન વેદ્મિ સુખદાયકમ્ ।
ગોવિન્દં ભજતાં પુંસાં ભયં ન કલિકાલતઃ ॥ ૧૪૪॥

કુતો દુઃખં કુતો દૈન્યં નરકસ્ય ફલં કુતઃ ।
અનન્યભજનોપેતઃ પુમાન્નો લભતે ભયમ્ ॥ ૧૪૫॥

કા વા ચિન્તા નૃણાં તાત નૃહરિં ભજતામિહ ।
મરણસ્ય ભયં તેષાં યેષાં નો હૃદયે હરિઃ ॥ ૧૪૬॥

ભક્ત્યા સ્થિરત્વમાયાતિ પરબ્રહ્મમયોહિ સઃ ।
હરિર્હૃદિ ધૃતો યેન સ તુ નિર્ભયતામિયાત્ ॥ ૧૪૭॥

ઇત્થમત્યૂર્જિતં વાક્યં શ્રુત્વોવાચ સ દૈત્યરાટ્ ।
કિમયં શત્રુરૂપેણ પુત્રો જાતો મમ ગૃહે ॥ ૧૪૮॥

હિતં કથિતવાનસ્મિ ન શ્રૃણોતિ હિ મન્દધીઃ ।
નિર્ભયો માં વદત્યુચ્ચૈર્જલ્પન્ યત્કિઞ્ચિદુદ્ધતઃ ॥ ૧૪૯॥

ત્યજામ્યેનં યદિ સુતં તર્હિ તન્નૈવ શોભનમ્ ।
અનીતિર્મહતી જાતા શત્રુપક્ષો ગૃહે મમ ॥ ૧૫૦॥

સમુત્પન્નઃ કિમુત્પન્નં મમ ભાગ્ય ક્ષયાય વૈ ।
ગૃહેષુ વસતાં પુંસાં ત્રયોઽમિ સુખહેતવઃ ॥ ૧૫૧॥

કલત્રં રૂપસમ્પન્નં પિત્રોર્વચનકૃતસુતઃ ।
થેષ્ટં વસુભોગાર્થં વિગુણં સુખદં ન તત્ ॥ ૧૫૨॥

યસ્ય નાસ્તિ ગૃહે ભાર્યા સાધ્વી રૂપગુણાન્વિતા ।
તનયો વિનયી તસ્ય પુરુષાર્થફલં કુતઃ ।
તસ્ય ધિગ્ જન્મ દુર્બુદ્ધેઃ કેવલં દુઃખભોગિનઃ ॥ ૧૫૩॥

અસ્તુ વા મમ કા ચિન્તા પુત્રહેતોરનાથવત્ ।
ત્યજેદેકં કુલસ્યાર્થે ગાથેયં પરિવર્ણિતા ॥ ૧૫૪॥

દુર્નયં દુષ્ટચરિતં સ્વપુત્રં કુલપાંસનમ્ ।

ત્યજન્તિ માનિનઃ શૂરાસ્તસ્માદેનં ત્યજામ્યહમ્ ॥ ૧૫૫॥

ઇત્થં વિચિત્ય દૈત્યેન્દ્રો મનસા ક્રોધમાવિશત્ ।
સ ક્રુધા તાન્ મહોદ્રિક્તાન્ સ્વભૃત્યાનાદિદેશ હ ॥ ૧૫૬॥

રે રે ભૃત્યાઃ કુલાઙ્ગારમિમં નયત દુર્મતિમ્ ।
વધ્યતામાશુ શસ્ત્રૌઘૈર્નાત્ર કાર્યા વિચારણા ॥ ૧૫૭॥

યદિ મચ્છાસનં મૂઢા વઞ્ચયિત્વા કુલાધમમ્ ।
જીવન્તં મુઞ્ચતાં સદ્યઃ શિરાંસ્યેવ હરામિ વઃ ॥ ૧૫૮॥

ઇત્થં નિશમ્ય દિતિનન્દન શાસનં
તે દૈત્યાનુગાઃ કામચરાઃ સમસ્તાઃ ।
હાહા રવેણ જવિનો જગૃહુર્નિતાન્તં
દૈત્યરાજતનયં વિનયોપપન્નમ્ ॥ ૧૫૯॥

નિન્યુર્બહિર્વધભુવં ધૃતપાણિયુગ્મં
કોલાહલેન મહતા સહપૌરવર્ગૈઃ ।
સર્વાપરાધિનમિવાવગૃહીતચૌરં
શસ્ત્રાસ્ત્રપાશવિષવહ્નિજલાભિઘાતમ્ ॥ ૧૬૦॥

અથ તં કૃપયાવિષ્ટાઃ પ્રોચુસ્તત્પિતૃસેવકાઃ ।
અપિ વત્સ મહાભાગ શૃણુ પ્રહ્લાદ નો વચઃ ॥ ૧૬૧॥

પિતુર્વાક્યં ત્વયા શ્રાવ્યં ગૃહે સ્થેયં યથાસુખમ્ ।
તવ ભૃત્યા વયં સર્વે દાસીદાસહયાગજાઃ ॥ ૧૬૨॥

રાજ્યં પ્રાજ્યં ચ સર્વસ્વં વસુરત્નમયં મહત્ ।
તસ્યાજ્ઞાવશગાઃ સર્વે હન્મસ્ત્વાં નાત્ર સંશયઃ ॥ ૧૬૩॥

ઉગ્રશાસકૃત્તાતસ્તવ વક્રોક્તિમન્યુમાન્ ।
અવધ્યં ત્વાં ક્રુધા તાતઃ સ વધાય સમાદિશત્ ॥ ૧૬૪॥

યદિ ત્વં તસ્ય વાક્યં ચ કરિષ્યસિ મહામતે ।
તદા નેષ્યામહે તત્ર પુનસ્ત્વાં પુત્રસન્નિધૌ ॥ ૧૬૫॥

અયં તવ સુતઃ શ્રીમાન્દૈત્યેન્દ્ર તવ શાસનમ્ ।
કરિષ્યતિ ન સન્દેહઃ કૃપાં કુરુ મહામતે ॥ ૧૬૬॥

તતસ્તે ભવિતા મોક્ષો વધાદસ્માન્નૃપાત્મજ ।

તેષાં વાક્યં નિશમ્યાથ પ્રહ્લાદો દિવ્યદર્શનઃ ॥ ૧૬૭॥

ઉવાચ પુરુષાન્ ધીરઃ પિત્રાઽઽ દિષ્ટાન્ વધાય તાન્ ।
યૂયં હિંસત માં શીઘ્રં તત્ર માઽસ્તુ વિચારણા ॥ ૧૬૮॥

હરિં વિના સુખં સર્વં ત્યજામિ વિષવત્ ભટાઃ ।
સ ત્રાતા સર્વજન્તૂનાં પાપહર્તા નિરઞ્જનઃ ॥ ૧૬૯॥

તેનેદં સકલં વ્યાપ્તં હરિણા લોકધારિણા ।
તત્ર વૈ મનસઃ સ્થૈર્યં ભવેદ્યદિ હિ જન્મિનામ્ ॥ ૧૭૦॥

ન તેષામિહ વાઽન્યત્ર સંસારે દુર્લભં નૃણામ્ ।
સુકૃતૈર્બહુભિર્દેહી હરૌ ભક્તિં દધાતિ હિ ॥ ૧૭૧॥

પ્રસન્ને જગતાં નાથે સાયુજ્યમપિ સિધ્યતિ ।
ઇતિ નિશ્ચિતમન્તસ્થં જ્ઞાત્વા દૈત્યસુતસ્ય તે ॥ ૧૭૨॥

ક્રોધેન મહતા વ્યાપ્તા તામ્રાક્ષા દૈત્યસેવકાઃ ।
નિહન્યુર્નિશિતૈઃ ખડ્ગૈઃ શસ્ત્રાસ્ત્રૈસ્તરનેકધા ॥ ૧૭૩॥

ન તાનિ શસ્ત્રાણિ સુતેજનાનિ વિશન્તિ દૈત્યેન્દ્રસુતસ્ય દેહમ્ ।
શિલાં સમાધાય યથા સુતીક્ષ્ણા નિસ્ત્રિંશધારાઃ સહસા વિનમ્રાઃ ।
તથા શરીરં દિતિજેન્દ્રસૂનોઃ સમ્પ્રાપ્ય શસ્ત્રાણિ તતો બભઞ્જુઃ ॥ ૧૭૪॥

યદા ન શસ્ત્રૈઃ સ મમાર બાલસ્તતોઽગ્નિમાદીપ્ય ચ દૈત્યભૃત્યાઃ ।
ઃઉદ્ધૃત્ય તં દૈત્યસુતં સુઘોરાસ્તે નાગ્નિના તે દદહુઃ સમગ્રાઃ ॥ ૧૭૫॥

તથાઽગ્નિના પરિવ્યાપ્તઃ પ્રહ્લાદો ન વિષીદતિ ।
યથા ગ્રીષ્મોષ્પણા તપ્તઃ સુખં ચાસ્તે જલાશયે ॥ ૧૭૬॥

તત્રાપિ સ હરિં સ્તૌતિ સોઽપિ પાતિ તથાવિધમ્ ।
શાન્તેઽગ્નૌ સ પુનસ્તદ્વદ્યથાપૂર્વમવસ્થિતઃ ॥ ૧૭૭॥

તદોત્થાય મહાઘોરા નિર્દયા દૈત્યસેવકાઃ ।
ગુર્વી શિલાઙ્ગલે બધ્વા તં મમજ્જ મહાહૃદે ॥ ૧૭૮॥

મજ્જયતં જલે દૃષ્ટ્વા સંન્યાસિનમિવ પ્રજાઃ ।
ન મમજ્જ મહાધીરોઽલામ્બુનેવ સુરક્ષિતઃ ॥ ૧૭૯॥

યથા કશ્ચિજ્જલે યાતિ તદ્વદ્દિતિજનન્દનઃ ।
હરિનામજપાસક્તો ન સ જાનાતિ કિઞ્ચન ॥ ૧૮૦॥

અથ તે વિસ્મયાવિષ્ટાસ્તદ્ દૃષ્ટ્વા લાઘવં શિશોઃ ।
તત્પિત્રે કથયામાસુર્નાયં વ્રજતિ સઙ્ક્ષયમ્ ॥ ૧૮૧॥

અસ્માભિર્ઘાતિતો બાલઃ શસ્ત્રાગ્નિજલબન્ધનૈઃ ।
ન મૃતિં યાતિ કિં કુર્મઃ કિં વા જાનાતિ ચેટકમ્ ॥ ૧૮૨॥

નિશમ્ય તદ્વચો દૈત્યઃ સમન્યુર્વાક્યમબ્રવીત્ ।
કુતસ્તેઽસ્તિ હરિર્બ્રૂહિ કિંવા સ્થાનં પ્રદર્શય ।
અન્યથા ત્વાં નિહન્મ્યદ્ય તીક્ષ્ણધારેણ ચાસિના ॥ ૧૮૩॥

ઇત્યુક્ત્વા સત્વરં દૈત્યો વિકોશં ખડ્ગમાદદે ।
સાક્ષેપં તમુવાચાથ મન્દ દર્શય મે હરિમ્ ॥ ૧૮૪॥

તદાગ્રહં તતો જ્ઞાત્વા પ્રહ્લાદો દિવ્યદર્શનઃ ।
ઉવાચ પિતરં ઘોરં હરિઃ સર્વત્ર તિષ્ઠતિ ॥ ૧૮૫॥

રવેરર્ધાસ્તસમયે તર્જન્યા નિર્દિશન્ પિતઃ ।
અસ્મિંસ્તમ્ભે હરિર્મેઽસ્તિ સર્વવ્યાપી જનાર્દનઃ ॥ ૧૮૬॥

સ્થાવરં જઙ્ગમં સર્વં જગત્તેનાણુરૂપિણા ।
વ્યાપ્તં તત્સત્તયા સર્વં ચેષ્ટતે સર્વદા વિભો ॥ ૧૮૭॥

અચેતનં તેન ભવેત્સચેતનં સ યાતિ નાનાવિધતાં પુનઃપુનઃ ।
ન તસ્ય કશ્ચિન્મહિમાનમઞ્જસા જાનાતિ તં ભગવન્તં પ્રપશ્ય ॥ ૧૮૮॥

ઇત્યુક્ત્વા પિતરં ભૂયો નૃસિંહં સ્તૌતિ નિર્ભયઃ ।
ઇતિ ધાર્ષ્ટ્યં સ વિજ્ઞાય પુત્રસ્ય દિતિનન્દનઃ ॥ ૧૮૯॥

ક્રોધેન મહતા દીપ્તઃ ખડ્ગહસ્તો મહાબલઃ ।
સ્તમ્ભમુદ્દિશ્ય વેગેન સહસૈવોત્પપાત હ ॥ ૧૯૦॥

એતસ્મિન્નન્તરે દેવો નારસિંહાકૃતિં દધૌ ।
તસ્મિંસ્તમ્ભે સુનિર્ભિન્ને હરિરાવિર્બભૂવ હ ॥ ૧૯૧॥

ઇતિ શ્રીપદ્મપુરાણે વત્સગુલ્મમાહાત્મ્યે નૃસિંહતીર્થાખ્યાને નૃસિંહાવિર્ભવો નામ ત્રયોદશોઽધ્યાયઃ ॥

Proofread by M K Barman

*Vatsagulmamahatmye Nrisimha Akhyanam*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*